.. shrI gAyatrI aShTottara shatanAma stotram ..

# ॥ श्री गायत्री अष्टोत्तर शतनाम स्तोत्रम् ॥

हरिः ओं
तरुणादित्य संकाशा सहस्र नयनोज्ज्वला
विचित्र माल्याभरणा तुहिनाचलवासिनी १
वरदाभयहस्ताब्जा रेवातीर निवासिनी
प्रणित्ययविशेषज्ञा यंत्राकृत विराजित २
भद्रपाद परियाचैव गोविंदपथगामिनी
देवll—ft जि गणसंतुष्टा वनमालाविभूषिता ३
स्यंदनोत्तम संस्था च धीरजीमूतनिस्वना
मत्तमातंग गमना हिरण्यकमलासना ४
धीन जनोद्धारनिरता योगिनी योगधारिणी
नटनात्यैक निरता प्रणवाद्यक्षरात्मि का ५
घोराचारा क्रियासक्ता धारिद्र्यच्छेदकारिणि
यादवेंद्रकुलोद्भूता तुरीयपदगामिनी ६
गायतरी गोमती गंगा गौतमी गरुडासना
गेयगानप्रिया गौरी गोविंद पदपूजिता ७
गंधर्वनगरागारा गौरवर्णा गणेश्वरी
गुणाश्रया गुणवती गह्वरी गणपूजिता ८
गुणत्रय समायुक्ता गुणत्रय विवर्जिता
गुहावासा गुनाधारा गुह्या गंधर्वरूपिणि ९
गार्गप्रिया गुरुपदा गुह्लिंगांगधारिणि
सावित्री सूर्यतनया सुषुम्नानाडिभेदिनी १०
सुप्रकाशा सुखासीना सुमतिस्सुरपूजिता
सुषुप्त्यवस्था सुदती सुंदरी सागरांबरा ११
सुधांशुबिंबवदना सुस्तनी सुविलोचना
सीता सत्वाश्रया संध्या सुफला सुविधायिनी १२
सुभ्रूस्सुवासा सुश्रोणी संसार्ण व्रतारिणी
सामगान प्रिया साध्वि सर्वाभरण पूजिता १३
वैष्नवी विमलाकारा महेंद्री मंत्ररूपिणी
महलक्ष्मीर्महासिद्धिर्महामाया महेश्वरी १४
मोहिनी मदनाकारा मधुसूदनचोदिता
मीनाक्षी मधुरावासा नगेंद्रतना उमा १५
त्रिविक्रमपदा क्रांता त्रिसर्वा त्रिविलोचना

सूर्यमंडल मध्यस्था चंद्रमंडल संस्थिता १६
वह्निमंडल मद्यस्था वायुमंडल संस्थिता
व्योममंडलमध्यस्था चक्रिणी चक्ररूपिणी १७
कालचक्रवितानस्था चंद्रमंडल दर्पणा
ज्योत्स्नातपासुलिस्तांगी महामारुतवीजिता १८
सर्वमंत्राश्रया धेनुः पापघ्नी परमेश्वरी
नमस्तेस्तु महालक्ष्मी महासंपत्तिदायिनि १९
नमस्तुन्तु करुणामूर्ती नमस्ते भक्तवत्सले
गायत्र्यां प्रजपेद्यस्तु नाम्ना मष्टोत्तर शतम् फलशृतिः २०
तस्यपुण्यफलं सक्तुंब्रह्मणापि नशक्यते
प्रातः काले चमध्याह्नासायह्नावाद्विजोत्तम २१
ये पठंतीह लोकेस्मिन् सर्वान्कामानवाप्नुयत्
पठनादेव गायत्री नाम्नामष्टोत्तरं शतम् २२
ब्रह्महत्यादि पापेभ्यो मुच्यते नात्र संशयः
दिनेदिने पठेद्यस्तु गायत्री स्तवमुत्तमम् २३
स नरो मोक्षसाप्नोति पुनरावृत्ति विवर्जितम्
पुत्रप्रद मपुत्राणां, दरिद्राणां धनपदम् २४
रोगीणांरोगशमनं, सरैश्वर्य प्रदायकम्
बहुनात्र किमुकैन स्तोत्रं श्री घ्रं फलप्रदम् २५
संपूर्ण

---

Please send corrections to sanskrit@cheerful.com
Last updated April 1, 2002